# Nitisaram

# નીતિસારમ્

## Document Information

Text title : Nitisaram

File name : nItisAram.itx

Category : misc, subhaashita, sahitya

Location : doc_z_misc_general

Author : mahAkavi ghaTakarpara

Proofread by : Seshadri N, PSA Easwaran

Description/comments : Kavyasangraha, Ed. John Haeberlin, 1847, Jibananda Vidyasagara 1888

Latest update : June 12, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2022

*sanskritdocuments.org*

# નીતિસારમ્

ગિરૌ કલાપી ગગણે પયોદા લક્ષાન્તરેઽર્કશ્ચ જલેષુ પદ્માઃ ।
ઇન્દુર્દ્વિલક્ષં કુમુદસ્ય વન્ધુર્યો યસ્ય મિત્રં ન હિ તસ્ય દૂરમ્ ॥ ૧॥

માતા નિન્દતિ નાભિનન્દતિ પિતા ભ્રાતા ન સમ્ભાષતે
ભૃત્યઃ કુપ્યતિ નાનુગચ્છતિ સુતઃ કાન્તા ચ નાલિઙ્ગતે ।
અર્થપ્રાર્થનશઙ્કયા ન કુરુતેઽપ્યાલાપમાત્રં સુહૃત્
તસ્માદર્થમુપાર્જયસ્વ ચ સખે સ્વાર્થસ્ય સર્વેવશાઃ ॥ ૨॥

ધનૈર્નિષ્કુલીનાઃ કુલીના ભવન્તિ
ધનૈરાપદં માનવા નિસ્તરન્તિ ।
ધનેભ્યઃ પરો વાન્ધવો નાસ્તિ લોકે
ધનાન્યર્જયધ્વં ધનાન્યર્જયધ્વમ્ ॥ ૩॥

અર્થસ્ય પુરુષો દાસો દાસસ્ત્વર્થો ન કસ્યચિત્ ।
ઇતિ સત્યં મહારાજ બદ્ધોઽસ્મ્યર્થેન કૌરવૈઃ ॥ ૪॥

ત્રિવિક્રમોઽભૂદપિ વામનોઽસૌ
સ સૂકરશ્ચેતિ સ વૈ નૃસિંહઃ ।
નીચૈરનીચૈરતિનીચનીચૈઃ
સર્વૈરુપાયૈઃ ફલમેવ સાધ્યમ્ ॥ ૫॥

ચલચ્ચિત્તં ચલદ્વિત્તં ચલજ્જીવનયૌવનમ્ ।
ચલાચલમિદં સર્વં કીર્તિર્યસ્ય સ જીવતિ ॥ ૬॥

સ જીવતિ યશો યસ્ય કીર્તિર્યસ્ય સ જીવતિ ।
અયશોઽકીર્તિસંયુક્તો જીવન્નપિ મૃતોપમઃ ॥ ૭॥

વૃદ્ધસ્ય વચનં ગ્રાહ્યમાપત્કાલે હ્યુપસ્થિતે ।
સર્વત્રૈવં વિચારેણ નાહારે ન ચ મૈથુને ॥ ૮॥

ક્વચિદ્રુષ્ટઃ ક્વચિત્તુષ્ટો રુષ્ટસ્તુષ્ટઃ ક્ષણે ક્ષણે ।

અવ્યવસ્થિતચિત્તસ્ય પ્રસાદોઽપિ ભયઙ્કરઃ ॥ ૯॥

નિમિત્તમુદ્દિશ્ય હિ યઃ પ્રકુપ્યતિ
    ધ્રુવં સ તસ્યાપગમે પ્રસીદતિ ।
અકારણદ્વેષિ મનસ્તુ યસ્ય
    કથં જનસ્તં પરિતોષયિષ્યતિ ॥ ૧૦॥

દશ વ્યાઘ્રા જિતાઃ પૂર્વં સપ્તસિંહાસ્ત્રયો ગજાઃ ।
પશ્યન્તુ દેવતાઃ સર્વા અદ્ય યુદ્ધં ત્વયા મયા ॥ ૧૧॥

સિંહ ઉવાચ -
ગચ્છ સૂકર ભદ્રન્તે બ્રૂહિ સિંહો મયા જિતઃ ।
પણ્ડિતા એવ જાનન્તિ સિંહસૂકરયોર્બલમ્ ॥ ૧૨॥

ઉદ્યોગિનં પુરુષસિંહમુપૈતિ લક્ષ્મી-
    ર્દૈવેન દેયમિતિ કાપુરુષા વદન્તિ ।
દૈવં નિહત્ય કુરુ પૌરુષમાત્મશક્ત્યા
    યત્ને કૃતે યદિ ન સિદ્ધ્યતિ કોઽત્ર દોષઃ ॥ ૧૩॥

એકા ભાર્યા પ્રકૃતિમુખરા ચઞ્ચલા ચ દ્વિતીયા
    પૂરુસ્ત્વેકો ભુવનવિજયી મન્મથો દુર્નિવારઃ ।
શેષઃ શય્યા શયનમુદધૌ વાહનં પન્નગારિઃ
    સ્મારં સ્મારં સ્વગૃહચરિતં દારુભૂતો મુરારિઃ ॥ ૧૪॥

અતિદૂરપથશ્રાન્તાશ્છાયાં યાન્તિ ચ શીતલામ્ ।
શીતલાશ્ચ પુનર્યાન્તિ કા કસ્ય પરિદેવના ॥ ૧૫॥

અપમાનં પુરષ્કૃત્ય માનં કૃત્વા ચ પૃષ્ઠકે ।
સ્વકાર્યમુદ્ધરેત્ પ્રાજ્ઞઃ કાર્યધ્વંસો હિ મૂર્ખતા ॥ ૧૬॥

એકો હિ દોષો ગુણસન્નિપાતે નિમજ્જતીન્દોરિતિ યોઽવભાષે ।
નૂનં ન દૃષ્ટં કવિનાપિ તેન દારિદ્ર્યદોષો ગુણરાશિનાશી ॥ ૧૭॥

કૃતસ્ય કરણં નાસ્તિ મૃતસ્ય મરણં તથા ।
ગતસ્ય શોચના નાસ્તિ હ્યેતદ્વેદવિદામ્મતમ્ ॥ ૧૮॥

નાકાલે મ્રિયતે જન્તુર્વિદ્ધઃ શરશતૈરપિ ।
કુશકણ્ટકવિવિદ્ધ્વોઽપિ પ્રાપ્તકાલો ન જીવતિ ॥ ૧૯॥

નિમગ્નસ્ય પયોરાશૌ પર્વતાત્ પતિતસ્ય ચ ।
તક્ષકેનાપિ દષ્ટસ્ય આયુર્મર્માણિ રક્ષતિ ॥ ૨૦॥

કરોતુ નામ નીતિજ્ઞો વ્યવસાયમિતસ્તતઃ ।
ફલં પુનસ્તદેવ સ્યાદ્યદ્વિધેર્મનસિ સ્થિતમ્ ॥ ૨૧॥

ઇતિ શ્રીમહાકવિ ઘટકર્પર વિરચિતં નીતિસારં સમાપ્તમ્ ॥

Encoded by Seshadri N

Proofread by Seshadri N, PSA Easwaran

---

*Nitisaram*

pdf was typeset on June 12, 2022

Please send corrections to *sanskrit@cheerful.com*